संस्कृत

स्तोत्र

क्र.नं. [illegible]

अपराध सुंदर स्तोत्र

६७८ | स्तो ६

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रीगणेशायनमः॥ आदौकर्मप्रसंगात्कलयतिकलु-
षंमातृकुक्षौस्थितस्यतन्मुत्रामेध्यमध्येक्वथयतिनि
तरांजाठरोजातवेदः॥ यद्यद्वातत्रदुःखंव्यथयतिनि
तरांशक्यतेकेनवक्तुंक्षंतव्योमेपराधःशिवशिव
वशिवभोश्रीमहादेवशंभो॥१॥ बाल्येदुःखातिरे
कान्मललुलितवपुस्तन्यपानेपिपासानोशक्ति
श्चेंद्रियेभ्योभवगुणजनिताजंतवोमांतुदंति

नानारोगादिदुःखाद्रुदनपरिवशःशंकरंनःस्म
रामिक्षंतव्योमेप०॥२॥ प्रौढोहंयौवनस्थोविष
यविषधरैःपंचभिर्मर्मसंधौदृष्टोनष्टोविवेकः
सुतधनयुवतिःस्वादुसौख्येनिषण्णः॥ शैव
चिंताविहीनंममहृदयमहोमानगर्वाधिरूढंक्षं
तव्योमेप०॥३॥ वार्धिक्येचेंद्रियाणांविगतिर्म गति
तिश्चाधिदेवाधितापैःपापरोगैर्वियोगैर्विषट्

शवपुषैःप्रौढहीनंचदीनं॥ मिथ्यामोहाभिला
षैर्भ्रमतिममनोधूर्जटेध्यानशून्यंक्षंतव्योमे०॥४॥
नोशक्यंस्मार्तकर्मप्रतिपदगहनेप्रत्यवायाकुली
ख्यंश्रौतेवार्ताकथंमेद्विजकुलविहितैर्ब्रह्ममार्गे
ष्वसारे॥ ज्ञातोधर्मोविचारैःश्रवणमननयोःकिं
निजध्याशितव्यंक्षंतव्योमेप०॥५॥ स्नात्वाप्रत्यू
षकालेस्नपनविधिविधौनाहृतंगांगतोयंपूजा

(२) र्थंवाकदाचिद्बहुतरगहनेखंडबिल्वीदळानि॥नानीता
पद्ममालासरसिविकसितागंधपुष्पैस्त्वदर्थंक्षंतव्योमेप०॥६॥
दुग्धैर्मध्वाज्ययुक्तैर्दधिसितसहितैःस्नापितंनैवलिंगंनो
लिप्तंचंदनाद्यैःकनकविरचितैःपूजितंनप्रसूनैः॥धू
पैःकर्पूरदीपैर्विविधरसयुतैर्नैवभक्ष्योपहारैःक्षंतव्यो
मेप०॥७॥ध्यात्वाचित्तेशिवाख्यंप्रचुरतरधनंनैवदत्तं
द्विजेभ्योहव्यंतेलक्षसंख्यैर्हुतवहवदनेनार्पितंबी
जमंत्रैः॥नोतप्तंगांगतीरेव्रतजपनियमैःरुद्रजाप्य
र्नवेदैःक्षंतव्योमेप०॥८॥स्थित्वास्थानेसरोजेप्रण
वमयमरुत्कुंभकेसूक्ष्ममार्गेशांतेस्वांतेप्रलीनेप्र
कटितगगनेज्योतिरूपेपराख्ये॥लिंगज्ञेब्रह्मवा
क्यंसकलतनुगतंशंकरंनस्मरामिक्षंतव्योमे॥९॥
नग्नोनिःसंगशुद्धस्त्रिगुणविरहितोध्वस्तमोहां
धकारैर्नासाग्रेन्यस्तदृष्टिर्विविधगुणमयंनैव
दृष्टंकदाचित्॥उन्मन्यावस्थयात्वांविगतकलि
मलंशंकरंनःस्मरामिक्षंतव्योमेप०॥१०॥चंद्रोद्भा
सितशेखरेस्मरहरेगंगाधरेशंकरेसर्पैर्भूषि
तकंठकर्णविवरेनेत्रोत्थवैश्वानरे॥दंतित्वक्कृ
तसुंदरांबरधरेत्रैलोक्यसारेहरेमोक्षार्थंकुरु
चित्तवृत्तिमखिलंअन्यस्तुकिंकर्मभिः॥११॥किं
वानेनधनेनवाजिकरिभिःप्राप्तेनराज्येनकिंकिं

(3) ३

धापुत्रकलत्रमित्रपशुभिर्देहेनगेहेनकिं ॥ ज्ञात्वेतत्क्षणभंगुरंसपदिरेत्याज्यंमनोदूरितःस्वात्मार्थंगुरुवाक्यतोभजभजेःश्रीपार्वतीवल्लभं ॥१२॥ आयुर्नश्यतिपश्यतांप्रतिदिनंयातिक्षयंयौवनंप्रत्यायांतिगताःपुनर्नदिवसाःकालोजगद्भक्षकः ॥ लक्ष्मीस्तोयतरंगभंगचपलाविद्युच्चलंजीवितंतस्मान्मांशरणागतंशरणयात्वंरक्षरक्षाधुनः

॥१३॥ करचरणकृतंवाकायजंकर्मजंवाश्रवणनयनजंवामानसंवापराधं ॥ विहितमविहितंवासर्वमेतत्क्षमस्वजयजयकरुणाब्धेश्रीमहादेवशंभो ॥ ॥१४॥ इतिश्रीमच्छंकराचार्यविरचितंअपराधस्कंदरस्तोत्रंसंपूर्णंश्रीसांबसदाशिवार्पणमस्तु ॥ ॥ ॥ ॥ ॥

" Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

प्रातरारभ्यसायान्हंसायान्हंप्रातरंतरं ॥ यत्करोमि ॥ भूमौतिष्ठतिपादानांभूमिदेवावलंबनं ॥ त्वयियांताःपरांयांतित्वमेवशरणंमम ॥२॥ शोध ॥ यत्करोमिजगंनाथतदस्तुतवपूजनं ॥१॥

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com